International Journal of Applied Research 2016; 2(3): 822-824



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(3): 822-824
www.allresearchjournal.com
Received: 19-01-2016
Accepted: 21-02-2016

**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

**Corresponding Author:**
**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

# वेदशिवस्य पूर्णावतार–कालभैरवस्वरूप–समीक्षणम्

**डॉ0 इन्द्रेश कुमार झा**

**प्रस्तावना:**

निर्गुण–निराकार–निर्विकल्पजगतः मूलं कारणं ब्रह्म (शिवः) स्वयमेव प्रकटो भूत्वा लोकान् सृजति, रक्षति, संहरति च। तस्य भगवतः शिवस्य स्वःपद्वयमस्ति–उग्रस्वःपः सौम्य–स्वःपश्च। उग्रस्वःपोऽस्ति–भैरवः, घोरः, रुद्रः, पशुपतिः, वीरभ्रदः, विःपाक्षः, कंकालश्च। तत्र भैरवस्वरूपस्य समीक्षणमत्र क्रियते– अधर्ममार्गमवरुद्ध्य धर्मसेतोः प्रतिष्ठापकः, स्वभक्ताभीष्टफलदायकः कालस्यापि भयोत्पादकः, प्रचण्डतेजोमूर्तिः, ब्रह्म–विष्ण्वादिदेवानाञ्चापि गर्वापहारक–भैरवो भगवतः शिवस्य पूर्णावतारो ऽस्ति।[1]

भैरवी–यातनाचक्रद्वारा पापिनाम् अनन्तानन्तपापानाम् विनाशकरणस्य विलक्षणा शक्तिरस्त्यस्य। देवाधिपतिरिन्द्रः ऋषिमण्डलीसहितो देवर्षिर्नारदश्चापि भैरवं संस्तुत्य कृतकृत्यो भवति। अथैकदा शंकरस्य विश्वमोहिनी–मायाग्रस्तो ब्रह्मा विष्णुम्प्रति आह–अहमेव सृष्टि–स्थिति–प्रलयकर्ता सर्वतोगरीयान् अस्मि।[2] उक्तञ्च–

जगद्योनिरहं धाता स्वयम्भूरज ईश्वरः।
अनादिभागहं ब्रह्म ह्येकात्मा निरञ्जनः।।
प्रवर्तको हि जगतामहमेव निवर्तकः।
संवर्तको मदधिको नान्यः कश्चित्सुरोत्तमाः।।

इत्याकर्ण्य विष्णुरपि प्रतिवादरूपेण प्रोक्तवान्–धातः! ममाज्ञया एव त्वं संसारं सृजसि। क्षणमपि मामनादृत्य संसारोऽयं स्थातुं नार्हति। अतः कथमहङ्कारमग्नोऽसि।[3] उक्तञ्च–

ममाज्ञया त्वया ब्रह्मन् सृष्टिरेषा विधीयते।
जगतां जीवनं नैव मामनादृत्य चेश्वरम्।।

एवं द्वयोर्विवाद–समापनाय साक्षीरूपेण भगवान् वेदः शिव एव परमतत्त्वमस्तीति यदा अघोषयत्तदा वेदस्य निर्णयः अनयोः कृते अमान्योऽभवत्। मायाविमोहितौ उभौ उक्तवन्तौ–रे वेद! अशुभरूपधारी, मुण्डमालाहारी, अहर्निशं शिवारमणकारी, सदा चिताभस्मधारी, उन्मुक्तजटः, भूत–प्रेत–सेवितश्च शिवः परमतत्त्वं भवितुमर्हति किम्? कथमेवं ब्रवीषि?

ततः विवादस्य समापनाय द्वयोरहङ्कारनाशाय च स्वयमेव ज्योतिःस्तम्भरूपेण प्रादुर्भूय शिवः आदिशत्–यो वरीयः स स्तम्भस्यास्य आद्यन्तं वर्णयत्। ततः स्तम्भस्य अधोभागादागत्य अहङ्कारशून्यो विष्णुः पराजयं स्वीकृतवान्। किन्तु स्तम्भस्योपरिष्टादागत्य ब्रह्मा साहङ्कारः मिथ्याभिभाषणं कृतवान्। ततस्तत्रैव ज्योतिःस्तम्भात् एको भयानकः कालपुरुषः प्रादुर्भूतः। तस्य नामकरणपूर्वकं तमादिशच्छिवः–कालोऽपि त्वत्तो भेष्यति, अतस्त्वं कालभैरवोऽसि। कालसमस्त्वं सुशोभितोऽसि, अतः कालराजोऽसि। दुष्टजनमर्दनकारणाद् आमर्दकोऽसि। भक्तानां पापभक्षणात्पापभक्षकोऽसि। उक्तञ्च–

प्राक्च पङ्कजजन्मासौ शास्यस्ते कालभैरव।।[4]
त्वत्तो भेष्यति कालोऽपि ततस्त्वं कालभैरवः।।[5]
ततःपरं शिवस्तत्रैव काशीपुर्याः आधिपत्यं तस्मै समर्पितवान्–
या मे मुक्तिपुरी काशी सर्वाभ्योऽपि गरीयशी।
आधिपत्यञ्च तस्यास्ते कालराज सदैव हि।।[6]

ततः येन मुखेन ब्रह्मा मिथ्याभिभाषणं कृतवान् असीत्तमेव मुखं शिवाज्ञया वामाङ्गुलिनखाग्रेण कालभैरवः (एवं विचार्य येनाङ्गेन पापो भवति तस्यैवाङ्गस्य शासनं समुचितम् इति विच्छेदितवान्। उक्तञ्च–

यदङ्गमपराध्नोति कार्यं तस्यैव शासनम्।
ततो ब्रह्मणश्छेदितकपालः कालभैरवस्य हस्ते न्यस्तः। सापराधो ब्रह्मा विष्णुश्च शिवं तुतोष। सन्तुष्टः शिवः ब्रह्मणः विष्णोश्च कल्याणाय भैरवमादिश्य प्रोक्तवान्—ब्रह्मणः शिरश्छेदेन ब्रह्मा व्यथितो जातः। अतः लोकशिक्षणाय प्रायश्चित्तःपेण त्वं भिक्षाचरणं कुरु। उक्तञ्च—
चर त्वं सततं भिक्षां कपालव्रतमास्थितः।[7]
आदेशानुसारं प्रायश्चित्ताचरणलीलायां प्रवृत्तो भैरवः ब्रह्महत्यया सह लोकत्रयं परिभ्रमन् विष्णुलोकं जगाम। तत्र विष्णोराज्ञया भगवती लक्ष्मी स्वहस्तेन तस्मै भिक्षां प्रायच्छत्। ततः परिभ्रमन् स वाराणसीमागच्छत्। तत्र कपालमोचननामकस्थाने तद्धस्तात् कपालोऽधोऽपतत्, भैरवश्च ब्रह्महत्यानिवृत्तो जातः। ब्रह्महत्या तत्रैव पाताललोके प्रविष्टा। तद्दिवसात् कालभैरवः वाराणस्यामेव स्थित्वा तां पुरीं रक्षति। बटुकभैरवः, आनन्दभैरवः, आसभैरवश्चेत्यादिनामभिः स एव लोके प्रसिद्धोऽस्ति। वाराणसी गत्वा कपालभैरवं ये न पूजयन्ति न ते वाराणसीगमनस्य फलमवाप्नुवन्ति। कालभैरवस्य महिमानं वर्णयन् ब्रवीति विष्णुः—

अयं धाता विधाता च लोकानां प्रभुरीश्वरः।
अनादिः शरणः शान्तः पुरःषड्विंशसम्मितः।।
सर्वज्ञः सर्वयोगीशः सर्वभूतैकनायकः।
सर्वभूतान्तरात्मायं सर्वेषां सर्वदः सदा।।[8]
एतस्याविर्भावः मार्गकृष्णाष्टम्यां जातः—
कृष्णाष्टम्यां तु मार्गस्य मासस्य परमेश्वरः।
आविर्बभूव सल्लीलो भैरवात्मा सतां प्रियः।।[9]

वाराणस्याः अष्टासु दिक्षु रुरुभैरवः, चण्डीभैरवः, असिताङ्गभैरवः, कपालभैरवः, क्रोधभैरवः, उन्मत्तभैरवः, संहारभैरवश्चेत्यष्टभैरवानां दर्शनं पूजनं च सर्वाभीष्टप्रदमस्तीति मानवैरवश्यमेव तद्दर्शनं पूजनञ्च कर्तव्यमिति।
सौम्यःपोऽस्ति—चन्द्रशेखरः, वृषवाहनः, उमामहेश्वरः, सोमादयश्च।
एतैश्चन्द्रशेखरादिस्वःपैः शिवः समेषां कल्याणं करोतीति एतेषां स्वरूपाणाञ्च समर्चनं मानवैः कर्तव्यमिति।

**शिवस्याष्टमूर्तिसमीक्षणम्**

समस्तस्याखिलब्रह्माण्डस्य सृष्टिः कुतो भवति,केन ब्रह्माण्डमिदं संरक्षितं भवति, कस्मिंश्चान्तेऽन्तर्लीनं भवतीति जिज्ञासायामुच्यते—यतो वा इमानि भूतानि जातानि, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद् ब्रह्म।'
अर्थात् यस्माच्चराचरजगदिदमुत्पद्यते, येन संरक्षितं भवति, यस्मिन् चान्तेऽन्तर्लीनं भवति तस्य नामास्ति ब्रह्म। तस्य किं स्वःपमिति जिज्ञासायामुच्यते— 'एक एव रुद्रो न द्वितीयाय तस्थुः' रुद्र एव शिवशब्देन कथ्यते। अनेन सिद्धयति शिव एव ब्रह्मारूपेण ब्रह्माण्डं सृजति, विष्णुरूपेण पालयति, रुद्ररूपेण संहरति च।
शिवशब्दस्य शाब्दिकार्थोऽस्ति कल्याणम्। भगवतः शिवस्य अष्टौ प्रत्यक्षाः मूर्तयः सन्ति— जलमयीमूर्तिः, अग्निमयीमूर्तिः, यजमानमयीमूर्तिः, सूर्यमयीमूर्तिः, चन्द्रमयीमूर्तिः, आकाशमयीमूर्तिः, पृथिवीमयीमूर्तिः, वायुमयीमूर्तिश्च। एताभिरष्टा— भिर्मूर्तिभिः शिवः समेषां कल्याणं करोति। जगत्स्रष्टुराद्यामूर्तिरस्ति जलमयी। उक्तञ्च— 'अप एव ससर्जादौ तासु वीजमवासृजत्'। दृश्यते यज्जन्मतो मृत्युं यावत् क्षणमपि जनाः जलं विना स्थातुं न शक्नुवन्ति। जलेनैव अन्नानि भवन्ति। अन्नं विना जनाः कियद्दिनानि यावत् स्थातुं शक्नुवन्त्यपि, परं जलं विना दिनद्वयमपि स्नातुं न शक्नुवन्ति। जलेनैव पाकादिकार्यं भवति। जलेनैव पूजनादिकार्यं भवति। जलेनैव स्नानादिकं,मल—मूत्र—वस्त्रादीनां प्रक्षालनं, जीवनोपयोगिसर्वविधकार्यञ्च भवति। जलमेव जीवनमस्ति। अतः जलमयीमूर्तिद्वारा शिवः समेषां कल्याणं करोतीति।

**अग्निमयीमूर्तिः**

अग्निरपि शिवस्य प्रत्यक्षमूर्तिरस्ति। शिवः सर्वव्यापकोऽस्ति, अग्निरपि सर्वव्यापकोऽस्ति। जन्मतो मृत्युं यावत् तद्विना किमपि कार्यं न सिद्धयति। प्रसवगृहे प्राचीनकाले (इदानीमपि) अग्निरेव बालग्रहात् शिशुं रक्षतीति धारणा जनेषु प्रसृता आसीत् इति कारणात् प्रथमः अग्निप्रज्वालितो भवति। आधुनिकप्रसूतिकासम्बन्धि— सर्वविधकार्यं चिकित्सालये विद्युतद्वारैव भवति। पाकादिकार्ये चुलिकारूपेण पूजनादिकार्ये धूप—दीपादिरूपेण यज्ञेषु कुण्डस्थाग्निरूपेण च अग्नेरेव प्राधान्यं दृश्यते। समाजे यथा सर्वकार्येषु पुरोहितः अग्रे—अग्रे गच्छति तथैव अग्निरपि सर्वेषु कार्येषु अग्रणीर्भवति। ऋग्वेदादिषु अग्नेः प्राथम्यं विस्तृतेन वर्णितं दृश्यते। निरुक्तग्रन्थे यास्केन निर्वचनं कृतम्— अग्निः कस्मात्? अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। जलेषु वडवाग्निः पेण, उदरे जठराग्निरूपेण एवं बहिः अन्तश्च सर्वत्राग्निरस्ति। यज्ञेषु देवानां भोजनं (हविः) यदा वयम् अग्नौ प्रक्षिपामस्तदा अग्निरेव दूतरूपेण देवान् प्रति वहति। एवम्प्रकारेण वेदेषु— 'अग्निमीले पुरोहिम्.....' अग्न आयाहि वीतये' अग्निं दूतं वृणीमहे 'अग्नोतिर्कोतिरग्निः' इत्यादिभिर्मन्त्रैः अग्निः स्तुतः दृश्यते। अतः शिवः अग्निमयीमूर्तिद्वारा समेषां कल्याणं करोति। एवमन्याभिरपि मूर्तिद्वारा समेषां कल्याणं करोतीति कविताविलासकालिदासेन अभिज्ञानशाकुन्तल—नामकग्रन्थे शिवस्याष्टमयी— मूर्तिद्वारा मङ्गलाचरणं प्रस्तूयते—
या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हवि र्या च होत्री

ये द्वे कालं विधत्तः श्रुति—विषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।

जगदिदं पृथ्वी—जल—अग्नि—वायु—आकाशेति पञ्चमहाभूतानां संगठितस्व— रुपमस्ति। तदतिरिक्तं सूर्यः चन्द्रः जीवात्मा चेति सर्वं सम्मिल्य अष्टमूर्तिभिः चराचरजगदिदं व्याप्तमस्ति। क्षितिमूर्तेः अधिष्ठातृदेवोऽस्ति शर्वः, जलमूर्तेः अधिष्ठातृदेवोऽस्ति भवः, अग्निमूर्तेः अधिष्ठातृदेवोऽस्ति रुद्रः, वायुमूर्तेः अधिष्ठातृदेवोऽस्ति उग्रः, आकाशमूर्तेः अधिष्ठातृदेवोऽस्ति भीमः, यजमानमूर्तेः अधिष्ठातृदेवो ऽस्ति महादेवः,सूर्यमूर्तेरधिष्ठातृदेवोऽस्ति ईशानः। उक्तञ्च—

शर्वो भवस्तथा रुद्रः उग्रो भीमः पशोःपतिः।
ईशानश्च महादेवो मूर्तयश्चाष्टविश्रुताः।।[10]

पार्थिवशिवपूजनसमये सर्वत्रैव विशेषरूपेण (मिथिलायाम्) प्रत्यहं गृहे—गृहे प्रधानपार्थिवशिवलिङ्गस्य सर्वासु दिक्षु एभिर्मन्त्रैः अष्टमूर्तीनां पूजनं भवति—
ऊँशर्वाय क्षितिमूर्तये नमः। ऊँभवाय जलमूर्तये नमः। ऊँरुद्रायाग्निमूर्तये नमः। ऊँउग्राय वायुमूर्तये नमः। ऊँभीमायाकाशमूर्तये नमः। ऊँपशुपतये यजमानमूर्तये नमः। ऊँमहादेवाय सोममूर्तये नमः। ऊँईशानाय सूर्यमूर्तये नमः।
शिवपुराणे ब्रह्माद्वारा शिवस्याष्टमूर्तीनां स्तवनं कृतं दृश्यते—

नमस्ते भगवन् रुद्र भास्करामिततेजसे।
नमो भवाय देवाय रसायाम्बुमयात्मने।।

शर्वाय क्षितिःपाय नन्दीसुरभये नमः।
ईशाय वसवे तुभ्यं नमः स्पर्शमयात्मने।।

पशूनाम्पतये चौव पावकायातितेजसे।
भीमाय व्योमःपाय शब्दमात्राय ते नमः।।

उग्रायोग्रस्वःपाय यजमानात्मने नमः।
महाशिवाय सोमाय नमस्त्वमृतमूर्तये।।[11]

**शर्व :** शृणाति–हिनस्ति पापमिति शर्वः, तस्मै शर्वाय नमः।
**भव :** भवन्ति उत्पद्यन्ते जन्तवोऽस्मादिति भवस्तस्मै भवाय नमः।
**रुद्र :** रुत्–ज्ञानं तद् राति=ददातीति रुद्रस्तस्मै रुद्राय नमः।
**उग्र :** शत्रून् हन्तुं यदा विविधायुधयुक्तो भवति तदा उद्गूर्णायुधः कथ्यते, तस्मै उद्गूर्णायुधाय उग्राय नमः।
**भीम :** बिभ्यति अस्मादिति भीमः, तस्मै शत्रुभयोत्पादकाय नमः।
**पशुपति :** पशवः=जीवाः तान् पशून् पाति–रक्षति (अर्थात् सर्वेऽपि जीवा मायापाशैः बन्धनैर्बद्धाः भवन्ति तेभ्यो बन्धनेभ्यो मुच्यते) इति पशुपतिस्तस्मै पशुपतये नमः।
**ईशान :** यः स्वीय–ईशनीभिर्लोकान् शास्तीति ईशानस्तस्मै ईशानाय नमः।
**महादेव :** सर्वश्रेष्ठत्वान् महादेवः तस्मै महादेवाय नमः।

## आसामष्टमूर्तीनां तीर्थस्थानम्

1. सूर्यः– सूर्य एव दृश्यमानः प्रत्यक्षदेवोऽस्ति, नास्ति सूर्यशिवयोमर्थ्य वैभिन्न्यम्। सर्वाण्यपि सूर्यमन्दिराणि शिवमन्दिराण्येव सन्ति, तथापि काशीस्थ– गभस्तीश्वरलिङ्गं सूर्यःपशिवस्वःपमस्ति।
2. चन्द्रः– सौराष्ट्रस्य सोमनाथमन्दिरम्।
3. यजमानः–नेपालस्य पशुपतिनाथमन्दिरम्।
4. क्षितिलिङ्गम्–तमिलनाडुराज्ये शिवकाञ्चीस्थ–आम्रकेश्वरमन्दिरम्।
5. जललिङ्गम्–तमिलनाडुस्थ–त्रिचिरापल्ल्यां जम्बुकेश्वरमन्दिरम्।
6. तेजोलिङ्गम्–अरुणाचलपर्वतस्थिततेजोलिङ्गमन्दिरम्।
7. वायुलिङ्गम्–आन्ध्रप्रदेशस्य आरकेटस्थ–कालहस्तीश्वर–वायुलिङ्गमन्दिरम्।
8. आकाशलिङ्गम्–तमिलनाडुराज्ये चिदम्बरस्य आकाशलिङ्ग–मन्दिरम्। उपर्युक्ततीर्थ– स्थानानां दर्शनमात्रेणैव जनाः सर्वपापमुक्ताः भवन्तीति।

## द्वादशज्योतिर्लिङ्गानां समीक्षणम्

अखिलस्यास्य चराचरजगतः मूलं कारणं परब्रह्मपरमेश्वरः शिव एवास्ति। शिव एव ब्रह्मारूपेण लोकान् सृजति, विष्णुरुपेण लोकान् पालयति, महादेवरूपेण लोकान् संहरति च। अस्यैव शिवस्य प्रत्यक्षः स्वरूपोऽस्ति भगवान् सूर्यः। भगवति सूर्ये प्रत्यहं सृष्टि–स्थिति–प्रलयकार्यं द्रष्टुं शक्यते। शिवस्य सृष्टिप्रतिपादकस्वरूपस्य नामास्ति ब्रह्मा। ब्रह्मणः वर्णोऽस्ति रक्तः। उक्तञ्च– 'रजोजुषे जन्मनि'।[12] यदा कस्यचिच्छिशोर्जन्म भवति तदा तस्य वर्णस्ताम्रमयोऽत्यन्तं रक्तो भवति। भगवान् सूर्योऽपि यदा प्रातरुदेति तदा तस्य वर्णस्ताम्रमयोऽत्यन्तं रक्तो भवति, अर्थात् प्रातः काले भगवान् सूर्यः ब्रह्मारूपेणायाति। व्याप्त्यर्थकाद् विष्लु' इत्यस्माद्धातोः विष्णुशब्दः सिद्ध्यति, यस्यार्थो भवति सर्वव्यापकः, अर्थात् विष्णुः। मध्याह्नकाले भगवतः सूर्यस्य तेजः सर्वत्र व्याप्तं भवति। अतो मध्याह्ने सूर्यस्य तेजः पिङ्गलवर्ण इव भासते। अर्थात् मध्याह्नकाले भगवान् सूर्यः विष्णुरूपेणायाति। मृत्युकाले यथा कस्यचिज्जीवस्य स्वरूपं भवति तथैव सायंकाले भगवतः सूर्यस्य स्वरूपम् अरुण (रक्त) वर्ण इव दृश्यते। मृत्युप्रतिपादकोऽस्ति रुद्रः अर्थात् महेश्वरः। सायंकाले भगवान् सूर्यः महेश्वर– रूपेणायाति। उक्तञ्च[13]शुक्लयजुर्वेदसंहितायाम्–

## संदर्भः


1. शि.पु.शतरुद्र सं. 8/2
2. तत्रैव, 8/13, 14
3. शि.पु.शतरुद्र सं. 8/18
4. शि.पु.शतरुद्र सं. 8/46
5. शि.पु.शतरुद्र सं. 8/47
6. शि.पु.शतरुद्र सं. 8/50
7. शि.पु.शतरुद्र सं. 8/62
8. शि.पु.शतरुद्र सं. 9/11, 12
9. शि.पु.शतरुद्र सं. 9/63
10. शि.पु.श.रुद्र. सं. 2/3
11. शि.पु.वा.सं.पू. खं. 12/41–44
12. कादम्बरी–मंगलाचरणम्।
13. शु.यजु. 16/6